## प्रकरणम् ९ उपसंहारः ।

चतुर्दशसु विद्यासु पुराणं दीप उत्तमः ।
अन्धोऽपि न तदालोकात्संसाराब्धौ क्वचित्पतेत्[1] ।।
जैगीषव्योऽत्र जनको वृद्धश्चैव पराशरः ।
इमं पन्थानमासाद्य मुक्ता ह्यन्ये च मोक्षिणः[2] ।।

तत्कारणं सांख्ययोगाधिगम्यताम् । ऋषिं प्रसूतं कपिलं यस्तमग्रे[3]।
उपज्ञतां दर्शनराजवीथिषु श्रिता प्रपञ्चे प्रथिता चमत्कृता ।
युक्तिस्मृतिश्रौतसुराज्यमण्डिता सांख्यदृष्टिः कपिलप्रकाशिता[4] ।।
मखेषु हिंसामनलोज्वलां विना शक्ता स्वतन्त्रा प्रकृतिर्महेश्वरम् ।
सत्कार्यवादं निजरूपसंस्थितिं मुक्तिं प्रपञ्चाञ्चितमूचिवान्कविः[5]

सांख्यं योगो लोकायतं चेत्यान्वीक्षिकी[6] ।।
नास्ति सांख्यसमं ज्ञानं नास्ति योगसमं बलम् ।
अत्र वः संशयो मा भूज्ज्ञानं सांख्यं परं स्मृतम्[7] ।।

आस्तिकदर्शनेषु सांख्यदर्शनस्य मौख्यं स्थानमस्ति, तदेव सांख्यदर्शनं देवहूतिकर्दमयोः पुत्रेण महर्षिकपिलेन प्रवर्तितं वर्तते, तत्र दुःखानामात्यन्तिकनिवृत्तिः एव सांख्यदर्शनस्य प्रतिपाद्यो विषयो वर्तते,

---

[1] कल्याण-पुराणकथाङ्क-पृष्ठसंख्या-८

[2] बुद्धचरितम्-१२.६७

[3] श्वेत. उप. ५.२

[4] सांख्यतत्त्वकौमुदी-प्रस्तावना-पृष्ठसंख्या-८९

[5] सांख्यतत्त्वकौमुदी-प्रस्तावना-पृष्ठसंख्या-९०

[6] सांख्यतत्त्वकौमुदी-प्रस्तावना-पृष्ठसंख्या-९१

[7] महाभारतम्-शान्तिपर्व ३१६.२

प्रकृतिपुरुषविषयकभेदज्ञानजन्यमुक्तिलाभ एवास्य सांख्यदर्शनस्य प्रयोजनमस्ति, अस्मिन् सांख्यदर्शने पञ्चविंशतितत्त्वानां विचारः कृतोऽस्ति, एतेषां पञ्चविंशतितत्त्वानां सम्यग्ज्ञानेन मोक्षोऽवश्यं लभ्यते, इति अस्य सांख्यदर्शनस्य प्रमुखः सिद्धान्तो वर्तते, यथा -

**पञ्चविंशतितत्त्वज्ञो यत्र तत्राश्रमे वसेत् ।**
**जटी मुण्डी शिखी वापि मुच्यते नात्र संशयः[१] ।।**

एतादृशः श्रेष्ठतमो मम 'पुराणेषु सांख्ययोगवेदान्तविमर्श' इति नवनक्षत्रैर्विलसितः शोधमहानिबन्धः सांख्यजीवितेभ्यः समेभ्यः ज्ञानपिपासां प्रदास्यतीति मत्वा मया नव प्रकरणानि कृतानि सन्ति, तत्र प्रास्ताविके प्रथमे प्रकरणे मया चत्वारो वेदाः, वेदानामुपादेयता, षड्दर्शनानां परिचयः, दर्शनग्रन्थानामुपादेयता, सांख्यदर्शनस्य परिचयः, वेदाङ्गानां परिचयः, वेदाङ्गानामुपादेयता, इत्थं प्रास्ताविकं विधाय मया द्वितीये प्रकरणे पुराणानां परिचयः, पुराणानामाविर्भावः, इतिहासपुराणयोर्मध्ये भेदः, पुराणानां लक्षणानि, पुराणस्य दशलक्षणकत्वम् , पुराणानां प्रकारप्रकल्पनम् , महापुराणानां क्रमः, उपपुराणानां विवेचनम्, औपपुराणानां विवेचनम्, पुराणानां विषयाः, आख्यानोपाख्यानानि, गाथाः, कल्पशुद्धिः, पुराणसंहिता-पुराणमितिहासश्च, पुराणानां श्लोकसंख्या, पुराणेषु वर्ण्यविषयः, अनेन प्रकारेण वस्तुविषयं चतुर्दशभिः प्रकरणैः प्रस्तूय , मम शोधमहानिबन्धस्य तृतीयं प्रकरणं मया 'सांख्ययोगवेदान्तपदस्य निर्वचनम्' इति नामकं कृतमस्ति,

---

1 सं. वा. प्रवेशिका-पृ. सं. ३५

तस्मिन्मया सांख्यपदस्य निर्वचनम् , सांख्यपदस्य विविधा अर्थाः, सांख्यमेव योगः, वेदान्तपदस्य निर्वचनम्, विमर्शपदस्य निर्वचनम्, सांख्यदर्शनस्य कर्तृपरिचयः, सांख्यदर्शनस्य भाष्यकाराः, सांख्यदर्शनस्य वर्ण्यविषयः, सांख्यदर्शनस्य लोकोपयोगिता, इत्यादीनि दशप्रकरणानि कृत्वा सांख्यदर्शनमुपपस्थापितमस्ति, तदनन्तरं मम शोधमहानिबन्धस्य चतुर्थं प्रकरणम् 'पुराणेषु सांख्ययोगवेदान्तविमर्शः' इति विधाय पुराणेषु सांख्यीयतत्त्वपरिगणनम्, पुराणेषु प्रमाणविषयविवेचनम् , पुराणेषु सत्कार्य्यवादः, पुराणेषु गुणनिरूपणम् , पुराणेषु व्यक्ताव्यक्तभिन्नधर्म्माः, पुराणेषु प्रकृतिपरिणामः, इत्यादीनां सप्तानां प्रकरणानां विषयं विस्तीर्य्य पञ्चमे प्रकरणे पुराणेषु पुरुषसिद्धिः, पुराणेषु पुरुषबहुत्ववादः, पुराणेषु पुरुषधर्म्माः, पुराणेषु सृष्टिव्यवस्था, पुराणेषु बुद्धिस्वरूपम् , पुराणेषु अहङ्कारस्वरूपम् - इत्यादीनां विषयाणां सर्व्वाणि पुराणान्यालोड्य विमर्शः कृतो वर्तते, तदनन्तरं मम सर्व्वस्य विषयवस्तुनो विवेचनाय समावेशाय च शोधमहानिबन्धस्य 'पुराणेषु सांख्ययोगवेदान्तविमर्शः' इति नामके षष्ठे प्रकरणे पुराणेषु इन्द्रियसर्गः, पुराणेषु शून्यवादनिरासः, पुराणेषु गतिकर्मबन्धकारणतानिरासः, पुराणेषु अविद्याखण्डनम् , पुराणेषु सृष्टिप्रयोजनम् , पुराणेषु विवेककृतकृत्यता - इत्यादीनां विषयाणां सर्व्वाणि पुराणान्यालोड्य विमर्शः कृतो वर्तते, विस्तारभयादत्र षष्ठं प्रकरणमिदं समाप्य सप्तमे प्रकरणे पुराणेषु उपासनाफलम्, पुराणेषु जीवन्मुक्तशरीरावस्थानम् , पुराणेषु वेदानां स्वतःप्रामाण्यम् , पुराणेषु शरीरपञ्चभूतत्वनिरासः, पुराणेषु मोक्षब्रह्मरूपता, पुराणेषु देहविभागः,

पुराणेषु आत्मसिद्धिः, पुराणेषु बन्धमोक्षकारणम्, पुराणेषु पुरुषबहुत्वव्यवस्था, पुराणेषु ज्ञानमेव मुक्तिकारणम्, पुराणेषु अदृष्टकारणनिराकरणम्, पुराणेषु संयोगमात्रेण भोक्तुरधिष्ठातृत्वम्, पुराणेषु जीवस्य सिद्धौ अन्वयव्यतिरेकप्रमाणम्, पुराणेषु प्रकृतिपुरुषयोः स्वस्वामिभावस्य अनादित्वम् , इत्थं मम शोधमहानिबन्धस्य सप्तमे प्रकरणे पञ्चदशोपप्रकरणानि यथामति विस्तार्य्याष्टमे प्रकरणे मया सांख्यदर्शनस्य स्रोतः, सांख्यदर्शनस्य परम्परा, सांख्यदर्शने द्वन्द्वात्मको दृष्टिकोणः, सांख्यदर्शनस्य तत्त्वविवेचनम्, सांख्यदर्शनेनैव भगवत्प्राप्तिः, सांख्यदर्शनेनैव भवबन्धनमुक्तिः, सांख्यदर्शनेनैव इष्टसिद्धिः, इत्थं सप्तोपप्रकरणानि कृत्वा मदीये **‘पुराणेषु सांख्ययोगवेदान्तविमर्शः’** इति महाशोधनिबन्धस्य विषये संक्षिप्ताक्षरज्ञानाय संक्षिप्ताक्षरपरिचयं प्रदाय तत्तत्सन्दर्भग्रन्थानां सूची प्रदत्ताऽस्ति । भारतीयसंस्कृतेः विरुद्धानि यान्यपि बाह्यतत्त्वानि समागतानि तानि सर्वाणि स्वाञ्चले संस्कृत्या समाहितानि सन्ति, मया विलिखितः शोधमहानिबन्धोऽयं विशेषरूपेण पुराणजिज्ञासूनां कृते महानुपकारको भविष्यति, मुख्यतया शोधमहाप्रबन्धोऽयं नवसु (९) प्रकरणेषु विभक्तोऽस्ति, अन्ते च शोधप्रबन्धलेखने गृहीतसाहाय्यानां शिष्टविशिष्टसन्दर्भग्रन्थानां सन्दर्भग्रन्थसूची, तत्प्रकाशनसंस्थाननिर्देशपुरस्सरं प्रस्थापितं वर्तते । तथाऽपि –

**क्वाऽतिगम्भीरगीर्वाणी लेखनं क्वाऽस्म्यहं पुनः ।**

**गुरुदेवप्रसादेन[1] तथाऽपि पारगोऽभवम् ।।**

अस्मिन् शोधप्रबन्धे प्रदत्तैर्नवप्रकरणैः समस्तानां ज्ञानजलपिपासूनां पिपासा काचिच्छान्ता भविष्यति, एवं ज्ञानजिज्ञासूनां संस्कृतपारावारीणां कृते शोधमहाप्रबन्धोऽयं पथप्रदर्शको भविष्यतीति शम् । यद्यपि 'सगुणो निर्गुणो वाऽपि स्वलेखः कस्य न प्रियः' इति श्रीगोस्वामिना तुलसीदासेन कथितमस्ति, तथाऽपि – 'आपरितोषाद् विदुषां न साधु मन्ये प्रयोगविज्ञानम्' इति कविकुलकमलदिवाकरस्य श्रीकालिदासस्य वचनानुसारं संस्कृतविद्याजीवातूनां सर्वेषां विदुषां समक्षमिमां प्रार्थनां प्रकृत्य **'पुराणेषु सांख्ययोगवेदान्तविमर्शः'** इति विषयस्य नवभिः प्रकरणैः यथार्थतां यथामति प्रतिपाद्य शोधप्रबन्धसंक्षिप्तिकामिमां पूर्णङ्करोमि यद्–

**अदृश्यदोषान्मतिविभ्रमाद्वा**
**यत्किञ्चिदूनं लिखितं मया च ।**
**तत्सर्वमार्यैः परिशोधनीयं**
**कोपन्न कुर्यात् खलु लेखकस्य ।।**

अनुसन्धाता
गिरधरः बालकृष्णः उपाध्यायः

[1] डॉ. हरिप्रसाद पाण्डे